| | 03 | ❖ समानवचनकत्वसिद्धिप्रकारपरिज्ञाने समर्थो भविष्यति।<br>❖ अभेदान्वयबोधानुकूलाङ्क्षाविचारे योग्यतां प्राप्स्यति।<br>❖ विशेषणविभक्त्यर्थनिर्णये समर्थो भविष्यति। |
| | 04 | ❖ विभक्त्यर्थान्वयसम्पादने योग्यतां प्राप्स्यति।<br>❖ घटो घटः इत्यत्राभेदान्वयबोधवारणप्रकारविज्ञाने समर्थो भविष्यति।<br>❖ सिद्धान्तरूपेण अभेदान्वयबोधकारणस्य विज्ञाने समर्थो भविष्यति। |

**कार्यक्रमस्य परिणामः (Program Outcomes)**

- ❖ शाब्दबोधस्य उपकरणानि ज्ञास्याति ।
- ❖ वेदाः प्रमाणमित्यादिवाक्यानां सार्थकतासिद्धये प्रयुक्ताः युक्तीः ज्ञास्यति।
- ❖ शब्दार्थयोः अभेदनिर्वचने गदाधरमतम् अवगमिष्यति ।
- ❖ प्रातिपदिकार्थधात्वर्थयोः अभेदान्वयं ज्ञातुं दक्षो भविष्यति।
- ❖ अभेदान्वयबोधे सामान्यविशेषार्थयोः परिज्ञानं करिष्यति ।

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
## (केन्द्रीयविश्वविद्यालयः)

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**अचार्यतृतीयसत्रम्, तृतीयपत्रम्**

**पत्रसङ्केतः( कोड) / Paper Code- C-15 (NN), पत्रनाम /Paper Name- शक्तिवादः, म-म-गदाधरभट्टाचार्यविरचितः प्रारम्भतः धेनुपदशक्तिविचारान्तो भागः**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ शक्तिवादग्रन्थस्य परिचयं ज्ञास्यति।<br>❖ वृत्तिस्वरूपं तद्भेदस्वरूपञ्च ज्ञास्यति।<br>❖ पदार्थस्वरूपं ज्ञास्यति।<br>❖ शक्तेः स्वरूपं ज्ञास्यति।<br>❖ मीमांसकमतस्य परिज्ञानं भविष्यति।<br>❖ तात्पर्यस्य वृत्तित्वनिराकरणप्रकारं ज्ञास्यति।<br>❖ लक्षणायाः वृत्तित्वव्यवस्थापनप्रकारं ज्ञास्यति।<br>❖ ज्ञानशक्तिवादनिराकरणप्रकारं ज्ञास्यति।<br>❖ अन्विताभिधानवादपक्षं ज्ञास्यति।<br>❖ आकाशपद-धेनुपदयोः शक्तिस्वरूपस्य परिज्ञानं भविष्यति। | 01 | ❖ शक्तिवादग्रन्थस्य परिचयं ज्ञात्वा पदवृत्ते स्वरूपपरिज्ञाने समर्थो भविष्यति।<br>❖ पदार्थलक्षणं शक्तेस्वरूपं च ज्ञात्वा शब्दार्थनिर्णये प्रयोगसम्पादने च समर्थो भविष्यति।<br>❖ मीमांसकमतं ज्ञात्वा स्वसिद्धान्तदिशा तन्निराकारणे समर्थो भविष्यति। |
| | 02 | ❖ ईश्वरसंकेतरूपशक्तेः स्वरूपं ज्ञात्वा वाक्यप्रयोगे समर्थो भविष्यति।<br>❖ तात्पर्यस्य वृत्तित्वनिराकरणे समर्थो भविष्यति।<br>❖ लक्षणायाः स्वरूपं ज्ञात्वा तस्याः वृत्तित्वव्यवस्थापने समर्थो भविष्यति। |
| | 03 | ❖ ज्ञानशक्तिवादं ज्ञात्वा तन्निरसने सामर्थ्यं प्राप्स्यति।<br>❖ अन्विताभिधानवादं ज्ञात्वा तन्निरासे योग्यतां प्राप्स्यति।<br>❖ क्रोडपत्रस्य स्वारस्यं ज्ञात्वा विचारे निपुणो भविष्यति। |
| | 04 | ❖ आकाशपदस्य कुत्रशक्तिरितिविज्ञाने समर्थो भविष्यति।<br>❖ धेनुपदशक्तिस्वरूपं ज्ञात्वा मीमांसकाभिमतं मतं ज्ञात्वा च स्वसिद्धान्तव्यवस्थापने समर्थो भविष्यति। |
| **कार्यक्रमस्य परिणामः (Program Outcomes)** | | |
| ❖ शाब्दबोधस्य अनुकूलसम्बन्धातां ज्ञानं करिष्यति ।<br>❖ अन्विताभिधानाभिहितान्वयवादयो: शाब्दबोधस्य कार्यकारणाभावस्य ज्ञातार भविष्यति ।<br>❖ वाच्यवाचकयोः भावयोः स्वरूपं ज्ञास्यति।<br>❖ वृत्तिस्वरूपनिर्णये दक्षो भविष्यति ।<br>❖ आकाशधेनुपदार्थस्वरूपज्ञानार्थं गदाधरमतस्य समीक्षायां निपुणो भविष्यति । | | |

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
## (केन्द्रीयविश्वविद्यालयः)

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

### अचार्यतृतीयसत्रम्, पञ्चमपत्रम्

**पत्रसङ्केतः( कोड)** / Paper Code- C-16 (NN), **पत्रनाम** /Paper Name- (**वैकल्पिकशास्त्रीयविषयः**)**न्यायभाष्यम्, आचार्यवात्स्यायनविरचितम्, तृतीयचतुर्थाध्यायौ**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ आत्मनस्वरूपं ज्ञास्यति ।<br>❖ शरीरादिव्यतिरिक्तात्मास्वरूपं कथं निर्धारणीयमिति ज्ञास्यति ।<br>❖ मनसः चैतन्यनिरूपणे समर्थो भविष्यति ।<br>❖ इन्द्रियस्वरूपं ज्ञास्यति ।<br>❖ बुद्धेः स्वरूपं ज्ञास्यति ।<br>❖ क्षणभङ्गवादपक्षनिराकरणप्रकारं ज्ञास्यति ।<br>❖ प्रवृत्तिदोषाणां स्वरूपं ज्ञास्यति ।<br>❖ शून्यवादनिराकरणप्रकारं ज्ञास्यति ।<br>❖ प्रेत्यभावस्वरूपं ज्ञास्यति ।<br>❖ तत्त्वज्ञानोत्पत्तिप्रकारं ज्ञास्यति । | 01 | ❖ आत्मस्वरूपं ज्ञात्वा शरीरेन्द्रियाद्यात्मवादनिराकरणे समर्थो भविष्यति ।<br>❖ शरीरपरीक्षायाः परिज्ञानं भविष्यति ।<br>❖ इन्द्रियपरीक्षायाः परिज्ञानं भविष्यति ।<br>❖ अर्थपरीक्षायाः स्वरूपज्ञानं भविष्यति । |
| | 02 | ❖ बुद्धिनिराकरणप्रक्रियायाः स्वरूपज्ञापने समर्थो भविष्यति ।<br>❖ क्षणभङ्गवादपक्षनिराकरणप्रकारं ज्ञात्वा स्वसिद्धान्तव्यवस्थापने समर्थो भविष्यति ।<br>❖ मनसः परीक्षाप्रकरणपरिज्ञाने समर्थो भविष्यति । |
| | 03 | ❖ प्रवृत्तिदोषाणां स्वरूपं ज्ञात्वा व्यवहारिकत्वव्यवस्थापने समर्थो भविष्यति ।<br>❖ प्रेत्यभावस्वरूपं ज्ञात्वा भाष्यदिशा कार्यकारणनिर्धारणे समर्थो भविष्यति ।<br>❖ शून्यवादनिराकरणे समर्थो भविष्यति । |
| | 04 | ❖ फलपरीक्षास्वरूपपरिज्ञाने समर्थो भविष्यति ।<br>❖ दुःखस्वरूपं ज्ञात्वा तदपाकरणे समर्थो भविष्यति ।<br>❖ अपवर्गस्वरूपनिर्णये समर्थो भविष्यति ।<br>❖ तत्त्वज्ञानसाधनप्रकारनिर्णये समर्थो भविष्यति ।<br>❖ बाह्याभङ्गपक्षनिराकरणे समर्थो भविष्यति । |

**कार्यक्रमस्य परिणामः (Program Outcomes)**

1. आत्मतत्त्वनिर्णये सुयोग्यो भविष्यति।
2. पुनर्जन्मवादविचारे स्वमतानि समीक्षितुं दक्षो भविष्यति।
3. परमाणुसद्भावस्य युक्तीः ज्ञास्यति।
4. अवयविसद्भावे युक्तीः उपस्थापयितुं निपुणो भविष्यति।
5. मोक्षकारणानि ज्ञास्यति।

# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
# (केन्द्रीयविश्वविद्यालयः)

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**पत्रसङ्केतः( कोड) / Paper Code- C-16 (NN) पत्रनाम /Paper Name- (वैकल्पिकचयनितशास्त्रीयविषयः) न्यायशास्त्रतत्त्वविचारः**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ अनुमितेः स्वरूपज्ञानेन सह तत्कारणस्य परामर्शस्य व्याप्तेश्च स्वरूपज्ञानं भविष्यति।<br>❖ पक्षतायाः स्वरूपज्ञानं भविष्यति।<br>❖ हेत्वाभासस्य तद्भेदानां च स्वरूपज्ञानं भविष्यति।<br>❖ उपमान - शब्दप्रमाणयोः स्वरूपज्ञानं भविष्यति।<br>❖ जातौ शक्तिः व्यक्तौ वा शक्तिरिति मतं ज्ञात्वा जातिविशिष्टः व्याक्तिशक्तिवादस्य परिज्ञानं करिष्यति।<br>❖ लक्षणायाः स्वरूपज्ञानं भविष्यति।<br>❖ स्मृतेः मनसश्च स्वरूपज्ञानं भविष्यति।<br>❖ विशेषगुणानां सामान्यगुणानां च स्वरूपज्ञानं भविष्यति। | 01 | ❖ अनुमितेः स्वरूपं ज्ञात्वा तज्जनकस्य परामर्शस्य स्वरूपं ज्ञास्यति। येन समाजे अनुमितिकारणव्यवस्थापने समर्थो भविष्यति।<br>❖ मीमांसाकाभिमतपूर्वपक्षव्याप्तिस्वरूपं ज्ञात्वा तन्निराकरणे युक्तीं च ज्ञात्वा सिद्धान्तव्याप्तिस्वरूपनिर्वचने समर्थो भविष्यति। |
| | 02 | ❖ पक्षतायाः स्वरूपं ज्ञात्वा तद्वैशिष्ट्यस्य समाजोन्मुखीकरणे समर्थो भविष्यति।<br>❖ सद्हेतुपरिज्ञानेन सह तद्विपरीतस्य असद्हेतोः परिज्ञानं भविष्यति। येन व्यवहारे असदनुमितेः निराकरणे समर्थो भविष्यति। |
| | 03 | ❖ शव्दप्रमाणस्वरूपज्ञानेन सह शक्तिग्राहकनिर्धारणे समर्थो भविष्यति।<br>❖ व्यवहारजगति शक्यार्थस्य लक्ष्यार्थस्य च परिज्ञानेन सह व्यवहारे अनुप्रयोगयोग्यतामवाप्स्यति। |
| | 04 | ❖ स्मृतेः स्वरूपज्ञानेन सह आन्तरिकतत्त्वस्य मनसः परिज्ञाने समर्थो भविष्यति।<br>❖ मूर्तामूर्त्तगुणनिरूपणे सामान्य-विशेषगुणनिरूपणे च समर्थो भविष्यति। |

**कार्यक्रमस्य परिणामः (Program Outcomes)**

| | |
|---|---|
| 1. अनुमानप्रमाणस्य उपयोगितां ज्ञास्यति।<br>2. अनुमितेः स्वरूपं ज्ञास्यति।<br>3. अनुमितिकारण-परामर्शस्वरूपविचारः, मीमांसाकानां मतखण्डनस्य विचारे समर्थो भविष्यति।<br>4. पूर्वपक्षखण्डनपूर्वकं सिद्धान्तपक्षतायाः व्यवस्थापनं कर्तुं योग्यो भविष्यति ।<br>5. वर्तमानसन्दर्भे हेत्वाभासज्ञानस्य आवश्यकतां प्रतिपादयिष्यति।<br>6. सव्यभिचारादिहेत्वाभासानां निर्वचनं कर्तुं समर्थो भविष्यति। | 7. उपमानशब्दयोः स्वरूपं ज्ञास्यति।<br>8. शक्तेः स्वरूपं ज्ञास्यति।<br>9. जातेः शक्तिवादीनां मतखण्डनं कर्तुं योग्यो भविष्यति।<br>10. पद-पदभेदस्वरूपविचारं कर्तुं समर्थो भविष्यति।<br>11. शाब्दबोधे करणविचारे समर्थो भविष्यति।<br>12. स्मृतिमनसोः स्वरूपविचारे समर्थो भविष्यति।<br>13. गुणनिरूपणे मूर्तामूर्तादिगुणस्वरूपनिर्वचनं कथमस्तीति विचारे समर्थो भविष्यति।। |

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
## (केन्द्रीयविश्वविद्यालयः)

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**आचार्यचतुर्थसत्रम्, प्रथमपत्रम्**

**पत्रसङ्केतः( कोड) / Paper Code- C-17 (NN), पत्रनाम /Paper Name- सव्यभिचारप्रकरणम्,गादाधरीसहितम्, प्रतिबन्धकताघटितं द्वितीयलक्षणम्**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br><br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ प्रतिबन्धकताघटितपूर्वपक्षीयसव्यभिचारद्वितीयलक्षणं ज्ञास्यति।<br>❖ अस्य लक्षणस्य उद्भावने बीजं ज्ञास्यति।<br>❖ विशेषण-विशेष्यदलोपपादने कारणस्य निर्वचनं भविष्यति।<br>❖ विरोधोऽपि फलतः प्रतिरोध एव इति ग्रन्थस्य स्वारस्यं ज्ञास्यति।<br>❖ वस्तुतस्तुकल्पं ज्ञास्यति।<br>❖ सपक्षत्वादिपदसार्थक्यं गदाधरदिशा ज्ञास्यति।<br>❖ उपाध्यायमतं ज्ञास्यति।<br>❖ केचित्तु मते असाधारण्यदेः स्वरूपं ज्ञास्यति। | 01 | ❖ सव्यभिचारद्वितीयलक्षणोद्भावने बीजं ज्ञात्वा द्वितीयलक्षणस्वरूपरिज्ञाने समर्थो भविष्यति।<br>❖ विशेषण-विशेष्यदलयोः सार्थकपरिज्ञाने समर्थो भविष्यति। |
| | 02 | ❖ विरोधोऽपि फलत इत्यादि दीधितिग्रन्थसारपरिज्ञाने समर्थो भविष्यति।<br>❖ अनुमितिपदस्य विवरणार्थपरिज्ञाने समर्थो भविष्यति। |
| | 03 | ❖ असाधारण्यविषये परेषां मतं ज्ञास्यति। वस्तुतस्तुकल्पपरिज्ञाने समर्थो भविष्यति। |
| | 04 | ❖ उपाध्यायमतपरिज्ञाने समर्थो भविष्यति।<br>❖ केचित्तु मते असाधारणस्वरूपपरिज्ञाने समर्थो भविष्यति।<br>❖ सपक्षादेः स्वरूपपरिज्ञाने समर्थो भविष्यति। |

**कार्यक्रमस्य परिणामः (Program Outcomes)**

- ❖ शब्दो नित्योऽनित्यो वेत्यस्मिन् विषये युक्तीः ज्ञास्यति।
- ❖ प्रतिबन्धकशब्दार्थनिर्णये कुशलो भविष्यति ।
- ❖ विशेषणदलस्य सार्थकतत्वे प्रदत्तानां युक्तीनां परिज्ञानं करिष्यति ।
- ❖ पक्षसाध्यहेतूनां सदुपयोगिताः ज्ञास्यति ।
- ❖ आचार्याणां मतं समीक्षितुं कुशलो भविष्यति ।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**(केन्द्रीयविश्वविद्यालयः)**

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**आचार्यचतुर्थसत्रम्, द्वितीयपत्रम्**

**पत्रसङ्केतः( कोड)** / Paper Code- C-18 (NN), **पत्रनाम** /Paper Name- **प्रामाण्यवादः, गादाधरीसहितः, ग्रन्थादारभ्य प्रथमविप्रतिपत्तिसमाप्यत्यन्तो भागः**

| **पाठ्यक्रमस्य परिणामः (Course Outcomes)** | **इकाई** | **अधिगम-परिणामः (Learning Outcomes)**<br><br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ प्रथमविप्रतिपत्तौ सामग्रीपदस्य प्रयोजनं ज्ञास्यति।<br>❖ अप्रामाण्यग्राहकपदस्य प्रयोजनं ज्ञास्यति।<br>❖ मिश्रस्याभिप्रायपरिज्ञाने समर्थो भविष्यति।<br>❖ सामग्र्यां विषयग्रहनियमपक्षं ज्ञास्यति।<br>❖ यथार्थज्ञानस्वरूपं ज्ञास्यति।<br>❖ मिश्रमतनिराकरणप्रकारं दीधितिकारदिशा ज्ञास्यति।<br>❖ ज्ञानग्राहकत्वपदस्य सार्थक्यं ज्ञास्यति।<br>❖ गुरूमतस्य विवेचनं भविष्यति।<br>❖ भट्टमतस्य विवेचनं भविष्यति।<br>❖ शाब्दबोधे योग्यताज्ञानस्य कारणत्वविषयकं विचारो भविष्यति। | 01 | ❖ प्रथमविप्रतिपत्तौ सामग्रीपदस्य प्रयोजनं ज्ञात्वा कारणस्वरूपपरिज्ञाने समर्थो भविष्यति।<br>❖ अप्रामाण्यग्राहकपदस्य प्रयोजनं ज्ञात्वा अप्रामाण्यनिर्वचने समर्थो भविष्यति।<br>❖ विशिष्टज्ञानस्वरूपपरिज्ञाने समर्थो भविष्यति। |
| | 02 | ❖ प्रकारत्वस्वरूपनिर्वचने समर्थो भविष्यति।<br>❖ सामग्र्यां विषयग्रहनियमं ज्ञातुं प्रभविष्यति । |
| | 03 | ❖ यथार्थज्ञानस्य स्वरूपविज्ञाने समर्थो भविष्यति।<br>❖ प्रामाण्यवादविषये गुरूमतपरिज्ञाने समर्थो भविष्यति। |
| | 04 | ❖ प्रामाण्यवादविषये भट्टमिश्रयोः सिद्धान्तपरिज्ञाने समर्थो भविष्यति।<br>❖ शाब्दबोधे योग्यताज्ञानस्य कारणत्वं व्यवस्थापयितुं समर्थो भविष्यति।<br>❖ प्रामाण्यवादविषये न्यायसिद्धान्तं ज्ञातुं समर्थो भविष्यति। |
| **कार्यक्रमस्य परिणामः (Program Outcomes)** | | |
| ❖ प्रमाणानन्तरं प्रामाण्यस्य व्यवस्थापने दक्षो भविष्यति ।<br>❖ प्रथमविप्रतिपत्तौ मतान्तरस्य समीक्षां करिष्यति ।<br>❖ अप्रामाण्यग्राहकपदानां प्रयोजनानि ज्ञास्यति ।<br>❖ अव्यापकस्य अनुमितिविषये दीधितिकारस्य मतं ज्ञास्यति ।<br>❖ शाब्दबोधे योग्यतायाः कारणत्वम् अवगमिष्यति । | | |

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**(केन्द्रीयविश्वविद्यालयः)**

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**आचार्यचतुर्थसत्रम्, तृतीयपत्रम्**

**पत्रसङ्केतः( कोड) / Paper Code- C-19 (NN), पत्रनाम /Paper Name- व्युत्पत्तिवादः, भेदान्वयबोधादारभ्य प्रथमाकारकान्तो भागः**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br><br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ भेदान्वयबोधप्रकारं ज्ञास्यति।<br>❖ राजा पुरूष इत्यत्रान्वयवोधप्रकारं ज्ञास्यति।<br>❖ राज्ञः पुरुष इत्यत्र भेदान्वयवोधप्रकारं ज्ञास्यति।<br>❖ वृत्तिनियामकेत्यादिसंसर्गाणां स्वरूपज्ञानं भविष्यति।<br>❖ लाघव-गौरवपक्षं ज्ञास्यति।<br>❖ चैत्रो जानाति इत्यत्रान्वयवोधप्रकारं ज्ञास्यति।<br>❖ प्रत्ययस्वरूपं ज्ञास्यति।<br>❖ संख्यासम्बन्धविचारं ज्ञास्यति।<br>❖ आख्यातार्थं ज्ञास्यति। | 01 | ❖ भेदान्वयबोधप्रकारं ज्ञात्वा व्यवहारे वाक्यार्थवोधनिर्णेतुं समर्थो भविष्यति।<br>❖ नामार्थयोरन्वयबोधविज्ञाने समर्थो भविष्यति। |
| | 02 | ❖ राज्ञः पुरूषः इत्यत्र विभक्त्यर्थं ज्ञातुं समर्थो भविष्यति। वृत्तिनियामकेत्यादिसंसर्गपरिज्ञाने समर्थो भविष्यति।<br>❖ प्रतिबध्यप्रतिबन्धकभावे लाघवगौरवपक्षनिर्णये समर्थो भविष्यति। |
| | 03 | ❖ 'दधि पश्यति' इत्यत्रान्वयवोधनिर्धारणे समर्थो भविष्यति।<br>❖ 'तण्डुलं पचति' इत्यत्रान्वयबोधप्रकारनिर्णये समर्थो भविष्यति। |
| | 04 | ❖ प्रत्ययस्वरूपं ज्ञात्वा प्रत्ययार्थनिर्वचने समर्थो भविष्यति।<br>❖ संख्यान्वयप्रकारविज्ञाने समर्थो भविष्यति।<br>❖ आख्यातार्थपरिज्ञाने समर्थो भविष्यति।<br>❖ संख्यासम्बन्धस्वरूपपरिज्ञाने समर्थो भविष्यति। |
| **कार्यक्रमस्य परिणामः (Program Outcomes)** | | |
| ❖ भेदान्वयबोधविचारे कार्यकारणभावं ज्ञातुं योग्यो भविष्यति ।<br>❖ समासस्थले शाब्दबोधकरणे दक्षो भविष्यति।<br>❖ वृत्त्यनियामकसम्बन्धादीनि ज्ञातुं सक्षमो भविष्यति।<br>❖ विभक्त्यर्थनिर्णये निपुणो भविष्यति ।<br>❖ आख्यातार्थनिर्णये समीक्षायां निपुणो भविष्यति । | | |

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**(केन्द्रीयविश्वविद्यालयः)**

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**आचार्यचतुर्थसत्रम्, चतुर्थपत्रम्**
**पत्रसङ्केतः( कोड)** / Paper Code- C-20 (NN), **पत्रनाम** /Paper Name- **नव्यन्यायेतिहासः, भारतीयदर्शनस्येतिहासः, पाश्चात्त्यतर्कशास्त्रपरिचयश्च**

| पाठ्यक्रमस्य परिणामः (Course Outcomes) | इकाई | अधिगम-परिणामः (Learning Outcomes)<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ नव्यन्यायस्योत्पत्तिविकासक्रमं ज्ञास्यति ।<br>❖ शास्त्रान्तरेषु नव्यन्याययस्य प्रभावं ज्ञास्यति ।<br>❖ चार्वाकादीनाम्-अवैदिकदर्शनानां परिचयं ज्ञास्यति ।<br>❖ सांख्यादि-वैदिकदर्शनानां परिचयं सिद्धान्तं ज्ञास्यति ।<br>❖ पाश्चात्यतर्कशास्त्रस्य स्वरूपं ज्ञास्यति ।<br>❖ पञ्चावयवानां स्वरूपं ज्ञास्यति ।<br>❖ पदवाक्ययोः स्वरूपं ज्ञास्यति ।<br>❖ अनुमानस्य नियमं ज्ञास्यति । | 01 | ❖ नव्यन्यायस्य उत्पत्ति-विकासक्रमपरिज्ञाने समर्थो भविष्यति ।<br>❖ शास्त्रान्तरेषु नव्यन्यायस्य प्रभावं ज्ञात्वा शास्त्रान्तरीयपदार्थबोधे समर्थो भविष्यति ।<br>❖ नव्यन्यायशास्त्रीयसिद्धान्तपरिज्ञाने समर्थो भविष्यति । |
| | 02 | ❖ चार्वाकाद्यवैदिकदार्शनिकानां स्वरूपविज्ञाने समर्थो भविष्यति ।<br>❖ अवैदिदिकदार्शनिकानां सिद्धान्तपरिज्ञाने समर्थो भविष्यति ।<br>❖ सांख्ययोगदर्शनयोः सिद्धान्तपरिज्ञाने समर्थो भविष्यति । |
| | 03 | ❖ पूर्वोत्तरमीमांसादर्शनस्य परिचयं ज्ञात्वा सिद्धान्तपरिज्ञाने समर्थो भविष्यति ।<br>❖ वैशेषिकदर्शनारविन्दादिदर्शनयोः सिद्धान्तपरिज्ञाने समर्थो भविष्यति । |
| | 04 | ❖ पाश्चात्यतर्कशास्त्रस्य स्वरूपं ज्ञात्वा तार्किकयोग्यतां साधयिष्यति ।<br>❖ पञ्चावयववाक्यप्रयोगसामर्थ्यं प्राप्स्यति ।<br>❖ सांकेतिकतर्कशास्त्रस्य स्वरूपविज्ञाने समर्थो भविष्यति ।<br>❖ अनुमाननियमपरिज्ञाने समर्थो भविष्यति । |
| **कार्यक्रमस्य परिणामः (Program Outcomes)** | | |
| ❖ अवैदिकदर्शनानां सिद्धान्तान् ज्ञास्यति।<br>❖ वैदिकदर्शनानां सपरिचयं सिद्धान्तान् अवगमिष्यति ।<br>❖ न्यायशास्त्रस्य प्रमुखसिद्धान्तानाम् आचार्याणाञ्च ज्ञानं प्राप्स्यति।<br>❖ भारतीयदर्शनशास्त्रं ज्ञास्यति ।<br>❖ वाक्यादिसंरचनायाः योग्यतां विकासयिष्यति। | | |

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**(केन्द्रीयविश्वविद्यालयः)**

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**पत्रसङ्केतः( कोड)** / Paper Code- C-21 (NN), **पत्रनाम** /Paper Name- (**वैकल्पिकचयनितशास्त्रीयविषयः) न्यायशास्त्रतत्त्ववचारः**

| **पाठ्यक्रमस्य परिणामः (Course Outcomes)** | **इकाई** | **अधिगम-परिणामः (Learning Outcomes)**<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ निमित्तकारणगुणानां स्वरूपज्ञानं भविष्यति।<br>❖ रूपादिचतुष्टयगुणानां स्वरूपज्ञानेन सह पाकजप्रक्रियायाः क्षणप्रक्रियायाश्च अधिगमो भविष्यति।<br>❖ संख्यादिगुणानां विशेषज्ञानं भविष्यति।<br>❖ वुद्धिनिरूपणे अवशिष्टानाम् अप्रमाणां संशयादीनां परिज्ञानं भविष्यति।<br>❖ प्रामाण्यवादस्य व्याप्तिग्रहोपायस्य उपाधेश्च स्वरूपपरिज्ञानं भविष्यति।<br>❖ शब्दस्य प्रमाणान्तरत्वव्यवस्थापने युक्तीनामधिगमो भविष्यति।<br>❖ अनुमानभेदज्ञानेन सह सुखदुःखादिगुणानां स्वरूपज्ञानं भविष्यति।<br>❖ विध्यर्थविषये न्याय-मीमांसामतयोः परिज्ञानं भविष्यति।<br>❖ नञर्थस्य परिज्ञानेन सह अवशिष्टानां गुरुत्वादिगुणानाम् अवबोधो भविष्यति। | 01 | ❖ गुणानां निमित्तकारणत्वं ज्ञात्वा रूप-रस-गन्ध-स्पर्शगुणानां वैज्ञानिकपक्षज्ञापने समर्थो भविष्यति।<br>❖ पाकज-क्षणप्रक्रिययोः विषये आचार्याणां मतं ज्ञात्वा तयोः प्रक्रिययोः वैज्ञानिकपक्षं ज्ञास्यति।<br>❖ संयोग-विभागादिगुणानां कारणज्ञापने समर्थो भविष्यति। |
| | 02 | ❖ प्रमाप्रमयोः कारणस्वरूपं ज्ञात्वा संशयादीनां शास्त्रेषु व्यवहारेषु च उपयोगित्वप्रदर्शने समर्थो भविष्यति।<br>❖ प्रामाण्यवादस्य व्याप्तिग्रहोपायस्य च शास्त्रीयपद्धतिं ज्ञात्वा व्यवहारे तदुपयोगित्वसाधने च समर्थो भविष्यति।<br>❖ उपाधेः स्वरूपं ज्ञात्वा दोषोद्भावने समर्थो भविष्यति। |
| | 03 | ❖ शब्दस्य प्रमाणान्तरत्वे युक्तिं ज्ञात्वा तत्प्रयोगे समर्थो भविष्यति।<br>❖ अनुमानस्य भेदं ज्ञात्वा व्यवहारे तदुपयोगित्वसम्पादने समर्थो भविष्यति। |
| | 04 | ❖ विध्यर्थस्वरूपं ज्ञात्वा प्रयोगोन्मुखीकरणे समर्थो भविष्यति।<br>❖ नञर्थं ज्ञात्वा समाजे निषेधोन्मुखीकरणे समर्थो भविष्यति।<br>❖ शब्दस्य वैज्ञानिकपक्षावबोधने समर्थो भविष्यति। |

**कार्यक्रमस्य परिणामः (Program Outcomes)**

- ❖ निमित्तकारणगुणानां स्वरूपज्ञाने समर्थो भविष्यति।
- ❖ शब्दस्य प्रमाणान्तरत्वव्यवस्थापने युक्तीनामधिगमे समर्थो भविष्यति।
- ❖ अनुमानभेदज्ञानेन सह सुखदुःखादिगुणानां स्वरूपज्ञानं प्राप्स्यति ।
- ❖ विध्यर्थविषये न्याय-मीमांसामतयोः परिज्ञानं करिष्यति।
- ❖ नञर्थस्य परिज्ञानेन सह अवशिष्टानां गुरुत्वादिगुणानाम् अवबोधे समर्थो भवितुमर्हति ।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**(केन्द्रीयविश्वविद्यालयः)**

**Structure of the Postgraduate Programme as per Curriculum and Credit Framework for Postgraduate Programmes for 2 years Structure**

**दर्शनशास्त्रपीठम्, न्यायविभागः, विषयः- नव्यन्यायः**

**आचार्यचतुर्थसत्रम्, पञ्चमपत्रम्**

**पत्रसङ्केतः( कोड)** / Paper Code- C-21 (NN), **पत्रनाम** /Paper Name- (**वैकल्पिकशास्त्रीयविषयः)न्यायभाष्यम्,आचार्यवात्स्यायनविरचितम्, पञ्चमोऽध्यायः**

| **पाठ्यक्रमस्य परिणामः (Course Outcomes)** | **इकाई** | **अधिगम-परिणामः (Learning Outcomes)**<br>( अध्ययनानन्तरं छात्राणाम् अधिगम-परिणामः ) |
|---|---|---|
| ❖ जातेः स्वरूपं ज्ञास्यति।<br>❖ सूत्रभाष्यदिशा जातिभेदं ज्ञास्यति।<br>❖ जातिभेदेषु साधर्म्यवैधर्म्ययोः स्वरूपं ज्ञास्यति।<br>❖ प्राप्त्यप्राप्त्यादि जातीनां स्वरूपं ज्ञास्यति।<br>❖ अर्थापत्यादिसमानां स्वरूपं ज्ञास्यति।<br>❖ निग्रहस्थानस्वरूपं ज्ञास्यति।<br>❖ निग्रहस्थानभेदं ज्ञास्यति।<br>❖ प्रतिज्ञाहान्यादेः स्वरूपं ज्ञास्यति। | 01 | ❖ जातेः स्वरूपं ज्ञात्वा व्यवहारे तस्याः उपयोगित्वं साधयितुं समर्थो भविष्यति।<br>❖ जातिभेदेषु साधर्म्यवैधर्म्यसमयोः स्वरूपं ज्ञात्वा कथायामुपयोगित्वव्यवस्थापनसामर्थ्यं प्राप्स्यति। |
| | 02 | ❖ प्राप्त्यादिसमानां स्वरूपं ज्ञात्वा तासां सार्थकत्वं साधयितुं समर्थो भविष्यति। |
| | 03 | ❖ अर्थापत्यादिसमानां स्वरूपं ज्ञात्वा वादादौ प्रयोगप्रक्रियानिर्वचने समर्थो भविष्यति। |
| | 04 | ❖ निग्रहस्थानस्वरूपं ज्ञात्वा व्यवहारे तस्योपयोगित्वसाधने समर्थो भविष्यति।<br>❖ प्रतिज्ञाहान्यादेः स्वरूपं ज्ञात्वा कथायां छलादौ च तेषामुपयोगित्वं साधयितुं समर्थो भविष्यति। |
| **कार्यक्रमस्य परिणामः (Program Outcomes)** | | |
| ❖ कथायां जातिनिर्णये योग्यो भविष्यति।<br>❖ जातेः भेदान् ज्ञास्यति ।<br>❖ कथायां निग्रहस्थानस्योपयोगितासिद्धकरणे समर्थो भविष्यति ।<br>❖ शास्त्रान्तररीत्या मतानां समीक्षाकरणे सर्वथा निपुणो भविष्यति ।<br>❖ जातिनिग्रहस्थानयोः सुष्ठुप्रयोगे दक्षो भविष्यति । | | |

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

## न्यायविभागः(PSO)

**विषयः- नव्यन्यायः**

**आचार्यः**

सामाजिकविकासे न्यायशास्त्रम्

- ❖ सामाजिक-व्यवहारिकन्यायप्रणाल्यां पञ्चावयवानां (प्रतिज्ञाहेतूदाहर-उपनयनिगमनानि) प्रयोगसम्पादनम्।
- ❖ न्यायप्रणाल्यां दोषनिराकरणाय पञ्चहेत्वाभासानामनुप्रयोगः।
- ❖ न्यायप्रणाल्याः यथार्थत्वसम्पादनाय पक्षसत्त्वादिपञ्चरूपाणां विशिष्टाध्ययनम्।
- ❖ मीडिया परिकल्पनायां न्यायशास्त्रीयावदानम्।
- ❖ न्यायशास्त्रस्य कथातत्त्वस्य मीडियापरिकल्पनायामनुप्रयोगः।

नैतिकशिक्षायां न्यायशास्त्रीयावदानम्।

- ❖ धर्माधर्मयोः विशेषाध्ययनम्।
- ❖ त्रिविधसंस्काराणामवधारणा।
- ❖ चतुर्विध-आश्रमव्यवस्थानां विशेषाध्ययनम्।
- ❖ दोषयुक्तप्रवृत्तेः दोषरहितप्रवृत्तेश्च परिज्ञानम्।
- ❖ रागादिदोषपरिहारविधिसम्पादनम्।

आध्यात्मिकशिक्षायां न्यायशास्त्रस्य भूमिका।

- ❖ ईश्वरतत्त्वस्यावबोध।
- ❖ आत्मतत्त्वस्याध्ययनम्।

- ❖ मनस्तत्त्वस्य विश्लेषणम् ।
- ❖ अपवर्गस्य विशेषज्ञानम् ।

संस्कृतेनैव अध्ययनेन छात्रेषु वक्तृत्वकौशलस्य विकासः ।

- ❖ लेखनकलायाः विकासः।
- ❖ तार्किकपद्धतिमनुसृत्य शास्त्रार्थकौशलविकास।
- ❖ व्यवसायिकविकास।
- ❖ सञ्चारकौशलोन्नयनम् ।
- ❖ सामाजिकव्यक्तित्वस्य विकासः ।

अयं पाठ्यक्रमः द्विवर्षीयः वर्तते । यदन्तगते प्रत्येकस्मिन् वर्षे द्वे सत्रे स्तः । अतः आहन्य चत्वारि सत्राणि सन्ति ।

- ❖ न्यायवैशेषिकदर्शनं "भारतीयतर्कशास्त्ररूपेण" सुप्रसिद्धमस्ति । न्यायदर्शनस्य प्राचीननवीनयोः परम्परासम्बन्धितग्रन्थानां सिद्धान्तानां सूक्ष्मा समालोचना विशेषरूपेण नव्यन्यायस्य 'तार्किकप्रणाली" वर्तते । अस्याः परिज्ञानार्थं परम्पराप्राप्तया अध्यापनशैल्या दृष्टिः प्रदास्यते ।
- ❖ नव्यन्यायपरम्परायां 'तत्त्वचिन्तामणिकारेण" आचार्येण गंङ्गेशोपाध्यायेन विशिष्टपारिभाषिकशैल्यां न्यायदर्शनस्य तार्किकप्रामाण्यदृष्टिः समुपस्थापिता । एवं 'आचार्यस्य श्रीरघुनाथशिरोमणे: विशिष्टं चिन्तनं, तदुपरि गदाधरभट्टाचार्यस्य तथा जगदीशतर्कालङ्कारस्य यद् युक्तिकौशलं प्रतिपादनकौशलञ्च वर्तते, तस्य परिज्ञानार्थं सततम् अध्ययनमध्यापनञ्च परमावश्यकमस्ति । अत: छात्रान् नियमितरूपेण एतदध्यापयिष्यति ।

❖ प्राचीनन्यायपरम्परायाम् उदयनाचार्यस्य वाचस्पतिमिश्रस्य आचार्य वात्स्यायनस्य, महर्षिगौतमस्य च यद् गम्भीरचिन्तनमस्ति, तद् यथाविधि सम्यगध्यापयिष्यति।

❖ "**प्रमाणैरर्थपरीक्षणं न्याय":** आचार्यवात्स्यायनस्य उक्तपरिभाषाणुसा -रं प्रमाणैः दृश्यजगतः पदार्थानां सम्यक् परीक्षणं 'न्यायः । अतः प्रमाणानां सम्यक् परिज्ञानं कारयिष्यति।

❖ विशेषतः "**न्यायस्तर्कोऽनुमानम्"** आचार्यजयन्तभट्टस्य एतयुक्त्यनुसारं 'न्यायः' 'तर्कः' 'अनुमानञ्च' परस्परं पर्यायशब्दाः सन्ति । अतः त्रैकालिक प्रमेयानां प्रकाशकम् अनुमानप्रमाणं विशेषरूपेण अध्यापयिष्यति।

❖ परार्थानुमाने प्रतिज्ञादिपञ्चावयवानां यः प्रयोगोऽस्ति, तमाधारीकृत्य तथा गङ्गेशादयगदाधरभट्टादीनाम् आचार्याणां तार्किकचिन्तनस्य विश्लेषणं कृत्वा छात्रेषु अनुमानविषयकस्य विशिष्टज्ञानस्य सम्पादनं कारयिष्यति।

❖ पक्षप्रतिपक्षरूपेण 'वादकथायाः सम्यग्ज्ञानं कारयिष्यति । विशेषरूपेण भारतीयसंविधान प्रणाल्या न्यायप्रणाल्याञ्च शास्त्रीय तत्त्वानां यदि पूर्णतया उपयोगं करिष्यति तर्हि भारतीयन्यायव्यवस्था निश्चितरूपेण सुदृढतां प्राप्स्यति। संसदः कार्यप्रणाली अपि परिष्कृता भविष्यति।

❖ न्यायालये वादिप्रतिवादिभ्यां क्रियमाणयोः वादप्रतिवादयोः विमर्श यो दोषाः उपलभ्यते, तेषां दोषाणां निराकरणाय गौतमन्यायशास्त्रेण प्रतिपादिता वादप्रणाली अतीव उपयोगिनी वर्तते। हेत्वाभासपदार्थानां ज्ञानस्य महती उपयोगिता वर्तते। अतः मणिकारेण उक्तानां हेत्वाभासलक्षणानां परिष्कार ग्रन्थैः अध्ययनमध्यापनञ्च आवश्यकं भवति।

❖ "शब्दप्रमाणं लोकव्यवहारस्य भाषाविज्ञानस्य "च मूलाधारो वर्तते । एकस्य शब्दस्य उच्चारणेन अन्यार्थस्य प्रतीतिः कथं भवति, इत्यस्य ज्ञानार्थं 'शब्दसामर्थबोधशब्दस्य च : विष प्रमाणान्तरतायाः ज्ञानमित्यादियाणां जगदीशेन लिखितस्य

शब्दशक्तिप्रकाशिकाग्रन्थस्य अध्ययनं परमावश्यकमस्ति। येन लक्षणवृत्त्या अभिधावृत्त्या च शब्दस्य अर्थनियन्त्रितं कृत्वा कामपि लोकभाषां सुव्यवस्थितां कर्तुं शक्ष्यति । एदपि अध्यापयिष्यति।

❖ विश्वदार्शनिकचिन्तने ईश्वरविषयकाबधारणायाः चिन्तनं महत्वपूर्ण वर्तते । नास्तिकाः ईश्वरसिद्धिं न मन्यन्ते । परन्तु आस्तिकाः मन्यन्ते । अस्मिन् विषये प्राचीनपरम्परायाम् उदयनाचार्यः याः युक्तीः ईश्वरस्य सद्भावे प्रदर्शयन ईश्वस्य जगत्कारणत्वं प्रदर्शितवान्, ताः आधारीकृत्य न्यायकुसुमाञ्जलिग्रन्थस्य अध्ययनं भवति । येन एतद् ज्ञायते यद् अस्य संसारस्य सञ्चालक: नियामश्च ईश्वर एवास्ति। एतद् नास्ति स्वभावप्रचलितमाकस्मिकं वा । **"तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽनाय"** इत्येषः सार्वभौमिको वैदिकसिद्धान्तो ज्ञातः भवति।

❖ सर्वो लोकव्यवहारो युक्तिपूर्वको एव भवति। यथार्थज्ञानं सफलतायाः हेतुः भवति। अथ अयथार्थज्ञानमसफलतायाः जनकोऽस्ति। अतः यथार्थायथार्थयोः द्वयोः प्रकारयोः ज्ञानयोः स्वरुपपरिज्ञानमत्यन्तम् आवश्यकमस्ति । प्रमाणादिषोडशपदार्थानां ज्ञानं "न्यायदर्शनं " थाकारयित्वा यर्थायथार्थयोः विवेककरणे अध्येतॄणां प्रज्ञां पुष्टीकरोति।

❖ 'अनुमान प्रक्रिया' लोकव्यवहारे सर्वत्र अनुस्यूतास्ति। सद्धेतोः असद्धेतोः सम्यकपरिज्ञानं इमं प्रक्रियां पुष्टीकरोति । सामान्यनिरुक्ति सव्यभिचारप्रकरणादयो नव्यग्रन्थाः प्राचीनहेत्वाभासदृष्टेः विकसितस्वरूपं प्रकाशयन्ति । अस्य अध्यापनम् अध्येतॄणां प्रज्ञां सूक्ष्मचिन्तनकरने समर्थयति।

❖ शाब्दबोधे आकाङ्क्षादि यत्कारणमस्ति, तत्रापि सम्बन्धसापेक्ष :ो भवति। तदाधारीकृत्य छात्रेषु पदशक्तिसम्बन्धिनीम् अवधारणां विकासाय गदाधरभट्टाचार्यनिर्मितेन 'शक्तिवादग्रन्थेन न्यायदृष्ट्या विवेचनेत्यादिविषयान् अध्यापयिष्यति । येन

शास्त्रीयलौकिकमर्यादासम्बन्धितेषु छात्रेषु सर्वं शाब्दबोधविज्ञानं विकसितं भवति भविष्यति।

- ❖ भारतीयदर्शनशास्त्रस्य गौतमीयन्यायशास्त्रस्य च तुलनात्मकाध्ययनं परिशीलनं न्यायविभागेन सम्पादितं भविष्यति, येन छात्राः तार्किककौशले प्रतिपादनकौशले विवेचनकौशले च दृढतां प्राप्स्यन्ति।

**" प्रदीप : सर्वविद्यानामुपाय : सर्वकर्मणाम् ।**

**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥ "**

आचार्य कौटिल्यस्य इयमुक्तिः न्यायदर्शनस्य सर्वोपरि महत्तां प्रकाशयति।

- ❖ न्यायदर्शनस्य प्राचीन-नव्यभेदेन परम्पराद्वयमाश्रित्य ग्रन्थानां सिद्धान्तानाञ्च आलोडनं भवति। विशेषतः नव्यन्यायस्य या तार्किकप्रणाली विद्यते, तस्याः परिज्ञानार्थं दृष्टिः दीयते।
- ❖ वर्षद्वयाभ्यन्तरे नव्यन्यायपरम्परायां तत्त्वचिन्तामणिकारस्य गंगेशोपाध्यायस्य, रघुनाथशिरोमणेः च यादृशं विशिष्टचिन्तनं विद्यते तत्रपि गदाधरभट्टाचर्यस्य जगदीशतर्कालङ्कारस्य च यत् युक्तिकौशलं प्रतिपादनकौशलं च विद्यते, तस्य सुपरिज्ञानार्थं सततमध्ययनमध्यापनञ्च भवति।
- ❖ प्राचीनन्यायपरम्परायाम् उदयनाचार्यस्य वाचस्पतिमिश्रस्य, वात्स्यायनस्य, अक्षपादगौतमस्य च यादृशं गभीरं चिन्तनं विद्यते तस्य सम्यगध्यापनं भवति।
- ❖ परार्थानुमानक्षेत्रे प्रतिज्ञादीनां पञ्चावयवानां यादृशः उपयोगः विद्यते, तदाधारीकृत्य गङ्गेशमतमनुसृत्य च गदाधरभट्टाचार्यस्य यादृशं तार्किकं चिन्तनं विद्यते तस्य परिशीलनेन छात्रणामनुमानविषयकं विशिष्टं ज्ञानं सम्पादयितुं शक्यते।

विशेषतः भारतीय संविधान प्रणाल्यां न्यायप्रणाल्याञ्च शास्त्रीय-पञ्चावयवानां यदि पूर्णतया उपयोगः क्रियते चेत् तर्हि भारतीयन्यायव्यवस्था निश्चिततया दाढ्र्यं प्राप्स्यति।

- ❖ न्यायालये वादि-प्रतिवादिनः कथायां यादृशो दोषः सम्प्रति समुपलभ्यते तेषां दोषाणां निराकरणार्थं गौतमीयन्यायशास्त्रोक्तहेत्वाभासपदार्थानां महती उपयोगिता सिद्ध्यति । एतदर्थं मण्युक्त हेत्वाभासलक्षणस्य परिष्कारभूतग्रन्थस्य अध्ययनम्-अध्यापनञ्च आवश्यकमस्ति।

❖ एकशब्दोच्चारणेन अन्यार्थस्य प्रतीतिः कथनं भवति? एतदर्थं शब्दसामर्थ्यावधारणाय शब्दस्य प्रमाणान्तरत्वव्यवस्थापनाय, पारिभाषिकादिशब्दपरिज्ञानाय प्रकृतिप्रत्ययादिशब्दानां परिशीलनाय शब्दे साधुत्वप्रतिपादनाय जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका इति सूक्तिमनुरक्षणार्थं शब्दशक्तिप्रकाशिकाग्रन्थस्याध्ययनमध्यापनञ्च भवति । येन लक्षणया वृत्या, अभिधया वृत्या च शब्दार्थस्य नियन्त्रणं कर्तुं शक्यते ।

❖ प्राचीनपरम्परायामुदयनाचार्यैः ईश्वरस्य सद्भावे याः युक्तयः ईश्वरस्य जगत्कारणत्वे याः युक्तयश्च प्रदर्शिताः ताः आधारीकृत्य न्यायकुसुमाञ्जलिग्रन्थस्य अध्ययनमध्यापनञ्च भवति, येन अस्य संसारस्य सञ्चालकः नियामकश्च ईश्वर एव भवतीति नान्यः पन्था विद्यतेऽयनाय इति श्रुतेः यथार्थपरिज्ञानं। छात्रणां सम्यक्तया भवति।

❖ युक्तिक्षेत्रे यथार्थज्ञानं यथा अपेक्षितं भवति तथैव तद्विपरीतज्ञानस्य संशयादीनां पदार्थानामपि परिज्ञानं सापेक्षितमस्ति। एवञ्च कथाक्षेत्रे छलजातिनिग्रहस्थानानां यादृशोपयोगः साम्प्रतिके काले जनैः क्रियते तेषां सम्यग्ज्ञानं गौतमीयोक्तपदार्थानां ज्ञानमन्तरा सम्यक्तया भवितुं नार्हति इति गौतमसूत्रं वात्स्यायनभाष्येण सह अध्याप्यते ।

❖ अनुमानवाक्ये पक्षादौ हेतोः विद्यमानत्वमविद्यमानत्वं वेति जिज्ञासामुपस्थाप्य तस्य सम्यक् निर्धारणार्थं सव्यभिचारग्रन्थस्य अध्यापनं भवति येन पक्षे हेतोः अविद्यमानतायां यादृशाः दोषाः सम्भाविताः तेषां दोषाणां परीक्षणपूर्वकं यथार्थज्ञानं कर्तुं छात्रैः शक्यते।

❖ शाब्दबोधे आकांक्षादीनि यानि करणानि विद्यन्ते तत्रपि ये सम्बन्धाः सापेक्षिताः तान् आधारीकृत्य छात्रेषु व्युत्पत्तिसम्पादनाय पदशक्तेः सामर्थ्यावधारणाय च गदाधरभट्टाचार्यस्य शाब्दिक-मीमांसकेत्यादि मतनिरसनपूर्वकं न्यायदृष्ट्या यद् विवेचनकौशलं विद्यते तादृशं ग्रन्थरत्ने व्युत्पत्तिवादशक्तिवादौ अध्याप्येते। येन शास्त्रीयमर्यादा लौकिकीमर्यादा च छात्रेषु नोपेक्षिता भवेत्

❖ भारतीयतर्कशास्त्र-पारम्परिकगौतमीयन्यायशास्त्रयोः तुलनात्मकमध्ययनं परिशीलनञ्च न्यायविभागेन सम्पाद्यते । येन छात्रेषु तार्किककौशलं प्रतिपादनकौशलं, विवेचनकौशलं दृढतां प्राप्नोति।

❖ व्यवहारजगति छात्रणां मनः इतस्ततः न भ्रमेत् न वा अन्यत्र मनः गच्छेत् तदर्थं आत्मविद्यायाः, नैतिक शिक्षायाः अध्ययनमध्यापनं भवति येन छात्रेषु समाजोन्नायकचिन्तने मनः प्रवर्तेत।